## वासुदेवार्जुनाभ्यां वुन् । (९८/१४७८)

वासुदेवार्जुनशब्दाभ्यां वुन् प्रत्ययो भवति सोऽस्य भक्तिः इत्येतस्मिन् विषये । छाणोरपवादः । वासुदेवो भक्तिरस्य वासुदेवकः । अर्जुनकः । ननु च वासुदेवशब्दाद् गोत्रक्षत्रियाख्येभ्यः (४.३.९९/१४७९) इति वुञ्स्त्येव, न चात्र वुन्वुञोर्विशेषो विद्यते (म. भा. २.३१४), किमर्थं वासुदेवग्रहणम् ? सञ्ज्ञैषा [1]देवताविशेषस्य न क्षत्रियाख्या (म. भा. २.३१४) । 'अल्पाच्तरम्' (२.२.३४/९०५), 'अजाद्यदन्तम्' (२.२.३३/९०४) इति च अर्जुनशब्दस्य पूर्वनिपातमकुर्वन् ज्ञापयति अभ्यर्हितं पूर्वम् निपतति इति ॥

## गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ् । (९९/१४७९)

गोत्राख्येभ्यः क्षत्रियाख्येभ्यश्च प्रातिपदिकेभ्यः बहुलं वुञ् प्रत्ययो भवति सोऽस्य भक्तिः इत्येतस्मिन् विषये । अणोऽपवादः । वृद्धाच्छं[2] परत्वाद् बाधते । ग्लुचुकायनिर्भक्तिरस्य [3]ग्लौचुकायनकः । [4]औपगवकः । [5]कापटवकः । क्षत्रियाख्येभ्यः – नाकुलकः । साहदेवकः । [6]साम्बकः । आख्याग्रहणं प्रसिद्ध[7]क्षत्रियशब्दपरिग्रहार्थं, यथाकथंचित् क्षत्रियवृत्तिभ्यो मा भूत् । बहुलग्रहणात् क्वचिदप्रवृत्तिरेव[8] । [9]पाणिनो भक्तिरस्य पाणिनीयः । [10]पौरवीयः ॥

## जनपदिनां जनपदवत् सर्वं जनपदेन समानशब्दानां बहुवचने । (१००/१४८०)

जनपदिनो ये बहुवचने जनपदेन समानशब्दा[11]स्तेषां जनपदवत् सर्वं[12] भवति, प्रत्ययः प्रकृतिश्च सोऽस्य भक्तिः इत्येतस्मिन् विषये । जनपदतदवध्योश्च (४.२.१२४/१३४८) [13]इत्यत्र प्रकरणे [14]ये प्रत्यया विहिताः, ते जनपदिभ्योऽस्मिन्नर्थेऽतिदिश्यन्ते । जनपदिनो [15]जनपदस्वामिनः क्षत्रियाः[16] । अङ्गा जनपदो भक्तिरस्य आङ्गकः । वाङ्गकः । सौह्मकः । पौण्ड्रकः । [17]तद्वत् अङ्गाः क्षत्रिया भक्तिरस्य आङ्गकः । वाङ्गकः । सौह्मकः । पौण्ड्रकः । जनपदिनाम् इति किम् ? पञ्चालाः ब्राह्मणा भक्तिरस्य पाञ्चालः । सर्वग्रहणं प्रकृत्यतिदेशार्थं, स च द्व्येकयोः प्रयोजयति, वृद्धिनिमित्तेषु च वुञादिषु विशेषो नास्ति इति ।

मद्रवृज्योः [18]कनि विशेषः । मद्रस्यापत्यं, 'द्व्यञ्मगधकलिङ्गसूरमसादण्' (४.१.१७०/११८८), माद्रः । वृजिशब्दादपि, 'वृद्धेत्कोसलाजादाञ्ज्यङ्' (४.१.१७१/११८९), वार्ज्यः । स भक्तिरस्य इति [19]प्रकृतिनिर्ह्रासे कृते (म. भा. २.३१४), मद्रकः । वृजिकः । जनपदेन समानशब्दानाम् इति किम् ? [20]अनुषण्डो जनपदः पौरवो राजा, स भक्तिरस्य, पौरवीयः । बहुवचनग्रहणं [21]समानशब्दताविषयलक्षणार्थम् । अन्यथा हि यत्रैव समानशब्दता तत्रैवातिदेशः स्यात्, एकवचनद्विवचनयोर्न स्यात्, वाङ्गो वाङ्गौ वा भक्तिरस्य इति । [22]बहुवचने तु, बहुवचने समानशब्दानामेकवचनद्विवचनयोः सत्यपि शब्दभेदेऽतिदेशो भवति। वाङ्गः वाङ्गौ वा भक्तिरस्य वाङ्गक ॥

---

1. वासुदेव इति इत्यधिकम् क. 2. तु इत्यधिकम् फ. 3. ग्लौचुकायनः क. 4. औपगावकः ब. 5. नास्ति ब. 6. नास्ति फ, साल्वकः ह, साम्बकः – माभूत् नास्ति ड. 7. क्षत्रियपरिग्रहार्थम् फ. ह. 8. इति इत्यधिकम् फ. 9. पाणिनिः ड. इ. 10. नास्ति ड. 11. तुल्यशब्दाः इत्यधिकम् फ. 12. कार्यम् इत्यधिकम् फ. 13. इत्येतस्मिन् फ. 14. ये नास्ति क. 15. जनपदवाचिनः ब. 16. उच्यन्ते इत्यधिकम् ड. 17. तद्वत् – पौण्ड्रकः नास्ति फ. 18. कन् इति फ. 19. प्रकृतिनिर्देशे ड. 20. अनुखञ्जो ड. 21. समानशब्दानां ड. समानशब्दविषयोपलक्षणार्थम् ह, °लक्षणार्थे ब. 22. बहुवचनेषु समानशब्दानाम् ब. क. ड. फ.